**सूक्ष्मषट्चरण** पु॰ सूक्ष्मः षट्चरण इव । पत्त्मयूके राजनि॰

**सूक्ष्मा** स्त्री सूच–मन् सुक्च नेट् टाप् । १यूथिकायां शब्दच॰ । २क्षुद्रैलायां ३करुणयां ४वालुकायाञ्च राजनि॰ ।

**सूक्ष्माङ्ग** न॰ कर्म॰ । "पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् । अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम्" वेदान्तोक्ते भोगसाधने लोकद्वयगामिनि लिङ्गदेहे । सूक्ष्मशरीरादयोऽप्यत्र । सांख्यमते त्वस्यान्यविधसप्तदशावयवत्वं यथोक्तं सां॰ का॰ तत्त्वकौ॰ । "सूक्ष्मास्तेषां नियता मातापितृजा निवर्त्तन्ते" का॰ "सूक्ष्मादेहाः परिकल्पिता" तत्त्वकौ॰ । "परिकल्पिता अनुमिता परलोके कर्मफलभोगः सूक्ष्मदेहं विनाऽनुपपन्नः भोगत्वात् स्थूलदेहारम्भकक्ष्यादिजनितस्य सस्यस्य स्वदेहेनैव भोगवत् स्वदेहारम्भकर्मादिफलं यत्तत् स्वदेहेनैव भोग्यम् नेतरेण अन्यथा कृतहानाकृताभ्यागमप्रसङ्ग इत्यादितर्कैस्तत्त्वानुसन्धेयः । "पूर्वोत्पन्नमस(स)क्तं नियतं महदादिसूक्ष्मपर्य्यन्तम् । संसरति निरुपभोगं भावैरधिवासितं लिङ्गम्" का॰ । "प्रधानेनादिसर्गे प्रतिपुरुषमेकैकमुत्पादितम् । अस(श)क्तमव्याहतं शिलामप्यनुविशति नियतम् आ चादिसर्गात् आ च महाप्रलयादवतिष्ठते महदादिसूक्ष्मपर्य्यन्तं महदहङ्कारैकादशेन्द्रियपञ्चतन्मात्रपर्य्यन्तम् एषां समुदायः सूक्ष्मशरीरं शान्तघोरमूढैरिन्द्रियैरन्वितत्वाद्विशेषः" कौ॰ ।

**सूक्ष्मैला** स्त्री कर्म॰ । क्षुद्रैलायाम् (गुजराटी एलाच्) रत्नमा॰

**सूच** पैशून्ये (अन्तर्द्रोहे) अद॰ चु॰ उभ॰ सक॰ सेट् । सूचयति ते असुसूचत् त । बह्वचकत्वान्न षोपदेशः ।

**सूचक** त्रि॰ सूचयति अन्तर्द्रुह्यति सूच–ण्वुल् । १पिशुने अमरः अन्तर्द्रोहवति २बोधके च । ३काके ४कुक्कुरे ५बिडाले पुंस्त्री॰ मेदि॰ स्त्रियां ङीष् । ६पिशाचे ७सिद्धगणे दवुद्वे शब्दर॰ । ८नाटकप्रसिद्धे सूत्रधाराख्ये प्रधाननटे १०कथके हेमच॰ ११सूक्ष्मशालौ पु॰ राजनि॰ १२सीवनसाधनद्रव्ये पु॰ मेदि॰ ।

**सूचन** न॰ सूच-भावे ल्युट् । १हिंसने २ज्ञापने च । युच् । तत्र,टाप् पीड़ायाम् अभिनये च स्त्री विश्वः ।

**सूचि(ची)** स्त्री सूच–इन् वा ङीप् । १सीवनसाधने स्वनामख्याते लौहमयपदार्थे अमरः २शिखायां ३नृत्यभेदे रत्नको॰ । [जीविनि (दरजि) शब्दर॰ ।

**सूचिक** त्रि॰ सूचिः तया सीवनं शिल्पमस्यास्य ठन् । सूच्या-

**सूचिका** स्त्री सूचि+स्वार्थे क । १सूच्याम् । सूचिरिव कायति कै–क । २हस्तिशुण्डायाम् । सूचिकाधरः ।

**सूचिकाधर** पुंस्त्री॰ सूचिकां शुण्डां धरति धृ–अच् । गजे शब्दर॰ स्त्रियां ङीष् ।

**सूचिकाभरण** न॰ वैद्यकोक्ते औषधभेदे तत्पाकादि यथा "विषं पलमितं सूतः शाणकस्तू चूर्णयेद्द्वयम् । तच्चूर्णं संपुटे कृत्वा काचलिप्तशरावयोः । मुद्रां कृत्वाथ संशोष्य ततश्चुल्ल्यां निवेशयेत् । वह्निं शनैः शनैः कुर्य्यात् प्रहरद्वयसङ्ख्यया । तत उद्घाट्य तन्मुद्रामुपरिस्थशरावकात् । संलग्नो यो भवेद्धूमस्तं गृह्णीयाच्छनैः शनैः । वायुस्पर्शो यथा न स्यात्ततः कूप्यां निवेशयेत् । यावत् सूच्या मुखे लग्नं कूप्या निर्य्याति भेषजम् । तावन्मात्रो रसो देयो मूर्च्छिते सन्निपातिनि । क्षुरेण प्रच्छते मूर्ध्नि तत्राङ्गुल्या च घर्षयेत् । रक्तभेषजसम्पर्कात् मूर्च्छितोऽपि हि जीवति । तथैव सर्पदष्टोऽपि मृतावस्थोऽपि जीवति । यदा तापो भवेत्तस्य मधुरं तत्र दीयते" भैषज्यरत्ना॰ । "विषं पलं रसं शाणं तच्चूर्णं काचलेपिते । मृत्संपुटे च संरुध्य चुल्ल्यां संस्थाप्य पाचयेत् । शनैर्यामद्वयं पक्त्वा तं समुद्घाट्य शीतलम् । ऊर्ध्वपात्रगतं धूमं गृहीत्वाऽस्पृष्टमारुतम् । यावत् सूच्या मुखे लग्नं कूप्या आयाति भेषजम् । क्षुरेण प्रच्छते शीर्षे तत्राङ्गुल्या च घर्षयेत् । त्रिदोषे मूर्च्छितो जीवो रक्तभेषजसङ्गमात् । सर्पदष्टो मृतावस्थः सोऽपि जीवति तत्क्षणात् । दद्याच्च मधुरं तोयं सूचिकाभरणे रसे" इति रसप्रदीपः ।

**सूचिकामुख** पु॰ सूचिकेव क्रमसूक्ष्मं मुखमस्य । १शङ्खे हारा॰ । ६त॰ । २सूच्यामुखे न॰ ।

**सूचि(ची)क्षेत्र** न॰ सूच्याकारं क्षेत्रम् । लीलावतीप्रसिद्धे सूच्याकारके क्षेत्रभेदे क्षेत्रशब्दे २४०० पृ॰ दृश्यम् ।

**सूचित** त्रि॰ सूच-क्त । १कथिते २बोधिते ३हिंसिते च ।

**सूचिपत्रक** पु॰ सूचिरिव पत्त्रमस्य कप् । शितावरशाके राजनि॰ । सूचीदलादयोऽप्यत्र ।

**सूचिपुष्प** पु॰ सूच्याकारं पुष्पं पुष्पाग्रं यस्य । केतकवृक्षे जटा॰ । सूचीपुष्पादयोऽप्यत्र ।

**सूचिरोमन्** पु॰ सूचिरिव रोमाऽस्य । वराहे हारा॰ सूचीरोमन् तत्रार्थे त्रिका॰ । [व॰ । गरुड़े शब्दर॰ ।

**सूचिवत्** पु॰ सूचिरिव तदाकारचञ्चुरस्त्यस्य मतुप् मस्य

**सूचिवदन** पुंस्त्री॰ सूचिरिव वदनं यस्य । १नकुले स्त्रियां जातित्वात् ङीष् । २मशके पु॰ राजनि॰ ।

**सूचिशालि** पु॰ कर्म॰ । सूक्ष्मधान्ये श्यामाकादौ राजनि॰ ।